संस्कृत:वार्ता-

दिनाङ्क : 14.02.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य असम-राज्ये सार्द्ध चतु:पञ्चाशत् कोटिरूप्यकाणां अनेकसां विकासपरियोजनानां उद्घाटनम्, हरित-ध्वज-प्रदर्शनं च कृतम्।
- आर्थिक-कार्य-मन्त्रिमण्डल-समित्या पञ्चाशदुत्तर-अष्टादश-सहस्र-कोटि- रूप्यकाणां त्रि-बहुपथ-रेल-परियोजनानां चतु-राज्यानां द्वादश-जनपदेषु अनुमोदितम्।
- मन्त्रिमण्डलेन लक्षात्मक-कोटि रूप्यकात्मक नगरीय चैलेंज-फण्ड इति देयराशि: अनुमोदनं कृतं।
- अमरीकादेशस्य राष्ट्रपति: डॉनल्ड-ट्रम्प: विश्वस्य बृहत्तम-विमानवाहक-नौकां पश्चिम एशिया-प्रदेशं प्रति प्रेषयति।
- अन्ताराष्ट्रिय-पुरुष-विंशतिम्-प्रतिविंशतिः-क्रिकेट्-विश्वचषक-क्रीडायाम्, अद्य प्रातः एकादश-वादने कोलम्बो-नगरे, आयरलैण्ड्-दलेन ओमान-दलं षण्णवति धवानांकैः पराजितम्।

---

<u>प्रधानमन्त्री</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य असम-राज्ये सार्द्ध चतु:पञ्चाशत् कोटिरूप्यकाणां अनेकसां विकासपरियोजनानां उद्घाटनम्, हरित-ध्वज-प्रदर्शनं च कृतम्। गुवाहाटी-नगरे, सः त्रिसहस्र कोटि-रूप्यकाणां व्ययेन निर्मितस्य गुवाहाटी-उत्तर-गुवाहाटी-नगरयोः मध्ये सम्पर्कं संवर्धनाय ब्रह्मपुत्रानद्या: उपरि कुमारभास्करवर्मा-सेतोः उद्घाटनम् अकरोत्। सेतोः उद्घाटनानन्तरं, प्रधानमन्त्री समीपस्थे क्षेत्रे लचित-घट्टे गत्वा आई. आई. एम-गुवाहाटी इत्यस्य अस्थायी-परिसरस्य, कामरूप-जनपदस्य अमिङगांवे पूर्वोत्तर-क्षेत्रस्य राष्ट्रिय-दत्तांश-

केन्द्रस्य च आभासीय माध्यमेन उद्घाटनम् अकरोत्। भारतस्य चतुर्णां नगराणां कृते पी. एम. ई-बस-सेवा-योजनान्तर्गतं सपाद-द्विशत विद्युत्-बस-यानानि अपि प्रधानमन्त्रिणा ध्वजप्रदर्शनं कृत्वा उद्घाटितानि। येषु गुवाहाटी-नगरं प्रति शतानि, नागपुर-भावनगरयोः प्रति पञ्चाशत्, चण्डीगढ-नगरं प्रति पञ्चविंशति बस्-यानानि च सम्मिलितानि सन्ति।

इतः पूर्वम्, प्रधानमन्त्री, डिब्रूगढ-मण्डले राष्ट्रिय-राजमार्गस्य समीपे विकसितस्य मोरन-बाईपास-इत्यत्र आपत्कालीन-अवतरण-सौकर्यस्य उद्घाटनम् अकरोत्, यत्र योधृ-विमानानां, परिवहन-विमानानां, उदग्र-विमानानां च वायु-प्रदर्शनम् अभवत्। एतत् आपत्-अवतरण-सौविध्यं शत-कोटि-रूप्यकाणां व्ययेन निर्मितास्ति।

राज्यस्य एकदिवसीय यात्रायां प्रधानमन्त्री पश्चात् गुवाहाटी-नगरे बूथ-विजय-सङ्कल्प-सभाम् अभिसंबोधितवान्। सः अवदत् यत् असम-राज्यं समेत्य समग्र पूर्वोत्तर-क्षेत्रं भारतस्य अष्टलक्ष्मीति अस्ति।

प्रधानमन्त्री अवदत् यत् विगतेषु एकादश-वर्षेषु भाजपेति दलस्य नेतृत्वे एन. डी. ए-सर्वकारः पूर्वोत्तरक्षेत्रस्य विकासाय महत्त्वपूर्णां भूमिकां निरवहदिति। सः काङ्ग्रेस-दलस्य शासनावधौ अस्य प्रदेशस्य अवहेलनं अविकसितं चेति निन्दितवान्। सः अवदत् यत् गत एकादश वर्षेषु पूर्वोत्तरस्य कृते पञ्च-दशमलवोत्तर-पञ्च-लक्ष-कोटिरूप्यकाणि विनियोजितानि।

प्रधानमन्त्री सूचितवान् यत् तस्य सर्वकारः अस्मिन् क्षेत्रे सम्पर्क, मूलसौकर्यादि च क्षेत्राणां परिष्काराय कार्यं कुर्वन् अस्ति एतेन यूनां कृते वृत्यावसराणां सृजनं भविष्यति।

---

<u>सीसीईए</u>

आर्थिक-कार्य-मन्त्रिमण्डल-समित्या गतदिने त्रि-बहुपथ-रेल-परियोजनानां अनुमोदनं कृतम्। एता: परियोजना: दिल्ली-हरियाणा-महाराष्ट्र-कर्णाटक-राज्येषु स्थितेषु द्वादश-जनपदेषु विस्तृता: सन्ति। अनेन भारतीय-रेल-अन्तर्जालस्य प्राय: ऊन-नवत्युत्तर-त्रिशत्-किलोमीटर-

पर्यन्तं विस्तारो भविष्यति। एतासां परियोजनानां भावि-आकलनं प्राय: नवत्युत्तर-पञ्चशताधि-अष्टादश कोटि-रूप्यकाणि अस्ति। एता: परियोजना: प्राय: त्रिशोत्तर-द्विसहस्रतम वर्षपर्यन्तं पूर्णा: भविष्यन्ति।

---------------------------------------------------------

## मन्त्रिमण्डलम्

सूचना-प्रसारण मन्त्री अश्विनी वैष्णव: अद्य भणितवान् यत् अन्तिमं मन्त्रिमण्डल-समागमं साउथ-ब्लॉक-भवने गतदिने अभवत्। नवदिल्ल्यां वार्ताहरै: सह वार्तालापं कुर्वन्। असौ उक्तवान् यत् आगामिन: मन्त्रिमण्डल-समागमा: 'सेवा-तीर्थे' भविष्यन्ति। तेन उक्तं यत् अस्मिन् विषये एक: प्रस्ताव: अपि पारित:, साउथ-ब्लॉक-नॉर्थ-ब्लॉक इत्येते भवने ब्रिटिश-शासकै: विनिर्मितानि आसान्।

मन्त्रिमण्डल-समित्या 'अर्बन-चैजेंज-फण्ड' नाम देयराशे: अनुमोदनम् अपि विहितम्। यस्य कृते केन्द्रेण लक्षात्मक-कोटि रूप्यकाणि अनुमोदितानि। एतेन केन्द्रं परियोजनाया: व्ययं पञ्चविंशति: प्रतिष्ठानं संवहिष्यति, अवशिष्टं व्ययं विपणीषु संग्रहीष्यति। अनेन आगामिषु पञ्चवर्षेषु नगरीय-क्षेत्रे चतुर्लक्षात्मक-कोटि-रूप्यकाणां निवेश: अनुमीयते। भारतस्य विवर्धित-स्टार्टअप-पर्यावरणस्य एतस्य प्रोत्साहनार्थं केन्द्रीय-मन्त्रिमण्डलेन स्टार्टअप-इंडिया-फण्ड-ऑफ-फण्ड्स-इत्यस्य द्वितीय-चरणस्य स्थापना अपि अनुमोदिता।

यस्य निवेश: आहृत्य दश-सहस्र-कोटि-रूप्यकात्मक: भविष्यति। येन स्टार्टअप-क्षेत्रं भारतस्य निवेश-धन-संग्रह: सुलभे भविष्यति।

दूरसञ्चार –विकास-केन्द्रम् (सी-डीओटी) इत्यनेन 'सिनर्जी-क्वांटम् इंडिया प्राइवेट लिमिटेड' इत्यनेन सहयोग: सन्धि: हस्ताक्षरित:।

---------------------------------------------------------

## अमरीका-ईरानदेशौ

अमरीकादेशस्य राष्ट्रपति: डॉनल्ड-ट्रम्प: विश्वस्य बृहत्तम-विमानवाहक-नौकाया: 'यू-एस्-एस्-जेराल्ड-आर.फोर्ड्' इत्यस्य मध्यपूर्व-प्रदेशं प्रति प्रेषणं अनुमोदितम्। एषा नौका कैरेबियन सागरात् प्रेषिता अस्ति। विमानवाहनक-नौकाया: विनियोजनं तदा अभवत् यदा ईरानदेशेन सह वार्तालापस्य द्वितीय-चरण: प्रस्तावित: आसीत्। अन्यत्र ईरानदेशे जना: तेहरान-नगरे गतमासे संजातेषु रक्तरञ्जित-घटनासु मृतकानां कृते चत्वारिंशत् दिवसीयं शोक-समारोहं कुर्वन्ति।

---------------------------------------------------------

## जितेन्द्रसिंह

केन्द्रीय विज्ञान-प्रविधि-विभागस्य राज्यमन्त्री जितेन्द्रसिंह: उक्तवान् यत् विज्ञान-प्रविधि क्षेत्रे सर्वकारेण नवोन्मेष- उद्यमानां, कृतेअनुकूल-पर्यावरणस्य निर्माणं प्राधान्यं वर्तते इति प्रतिपादितम्। चेन्नई नगरे द्वि-दिवसीये 'राइज कॉन्क्लेव' नाम्नि कार्यक्रमे मुख्य भाषणे असौ अवदत् यत् देशस्य प्रत्येक: युवक:, नागरिकश्च राष्ट्र-निर्माणे सहभागित्वं कुर्यात्। तमिलनाडु राज्ये प्रशासनेन आरब्धानां विविध-उद्यमानां उल्लेख: कृत्वा स: उक्तवान् यत् मुद्रा-योजनया लाभान्वितेषु त्रिंशत् कोटि युवकेषु सप्तषष्टि: प्रतिशत् महिला: सन्ति।

---------------------------------------------------------

## अन्नपूर्णा देवी- शी-बाक्स्-पोर्टल्

केन्द्रीय-महिला-बाल-विकास-मन्त्री अन्नपूर्णा देवी अद्य अवदत् यत् सर्वकारस्य लक्ष्यम् अस्ति यत् प्रत्येकं कार्यक्षेत्रं महिलाभ्यः सुरक्षितं कृत्वा ताभ्यः समान-वृत्त्यावसरान् प्रदानम्। नवदिल्ली-नगरे कार्यस्थले महिलानां सुरक्षायाः विषये राष्ट्रियसम्मेलनं सम्बोधयन्ती मन्त्री अवदत् यत् शी-बाक्स्-पोर्टल् इत्यनेन महिलानां कृते कार्यस्थले स्व-निवेदनानां पञ्जीकरणं सुलभतरं जातम् अस्ति। मन्त्रिणा उक्तं यत् अनेकानि कार्यस्थलानि अस्मिन् केन्द्रीकृत-पटले

पञ्जीकृतानि सन्ति। मन्त्रिणा उज्ज्वला-मुद्रादि योजनानां महिला-कल्याण-योजनानां च प्रशंसापि कृता।

-----------------------------------------------------------

## विशेष-रेलयानानि

होली पर्वणि सुगमं निर्विघ्नं च यात्रां सुनिश्चेतुं जम्मू-रेल-मण्डलेन श्रीमाता वैष्णोदेवी कटरा-स्थानकात् नूतन-दिल्लली-वाराणसी-नगरयो प्रति विशिष्ट-आरक्षित-रेलयानानां संचालनम् उद्घोषित्। एतानि रेलयानानि फरवरी मासे संचालितानि भविष्यन्ति अद्य च मार्गे प्रमुख स्थानकेषु विरमिष्यन्ति। एतेषु जम्मू-कश्मीर, पञ्जाब, हरियाणा, उत्तरप्रदेश, राज्यानां यात्रिण: लाभान्विता: भविष्यन्ति।

-----------------------------------------------------------

## बैडमिण्टन

बैडमिंटन प्रतियोगितायां भारतीय बैडमिंटन पैरा-क्रीडक: प्रमोद-भगत: बीडब्ल्यूएफ पैरा-वर्ल्ड चैम्पियनशिप-प्रतियोगितां पुरूष- एसएल-वर्गे स्वर्ण-पदकमधिमतम्। तेन निर्णायक-द्वन्द्वे इण्डोनेशियाया: मोहम्मद-अल-इमरान इत्यमुं पराभूय पदकं इदं अर्जितम्। प्रतियोगितेयं बेहरीन-नगरे समायोजितम् सप्त-त्रिंशत् वर्षीय प्रमोद भगतेन चतुर्थवारं विश्व-श्रृंखलायां एकल-स्वर्ण-पदकं विजितम्।

-----------------------------------------------------------

## क्रिकेट्-टी-20-विश्वकप

अन्ताराष्ट्रिय-पुरुष-विंशतिम्-प्रतिविंशतिः-क्रिकेट्-विश्वचषक-क्रीडायाम्, अद्य प्रातः एकादश-वादने कोलम्बो-नगरे, आयरलैण्ड्-दलेन ओमान-दलं षण्णवति धवानांकैः पराजितम्। सम्प्रति कोलकातानगरे इंग्लैंड- स्कॉटलैण्ड-दलयोः मध्ये क्रीडा प्रचलति। स्कॉटलैंड दलेन इंग्लैंड

दलस्य सम्मुखे त्रिपञ्चाशत् अधिक एकशत धवनांकानाम् लक्ष्यं स्थापितम्। पश्चात् सायं सप्तवादने, अहमदाबादनगरे न्यूजीलैण्ड्-दलम् दक्षिण-आफ्रिका-दलम् सम्मुखीकरिष्यति ।

।। इति वार्ता: ।।